International Journal of Sanskrit Research 2023; 9(2): 226-229

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(2): 226-229
© 2023 IJSR
www.anantaajournal.com
Received: 13-12-2022
Accepted: 16-01-2023

**Seuli Biswas**
Research Scholar,
Jadavpur University, Kolkata,
West Bengal, India

# बुद्धचरिते आयुर्वेदसमीक्षा

**Seuli Biswas**

**सारांश**
संस्कृतसाहित्ये बहुनि प्रसिद्धकाव्यनाटकादीनि सन्ति, तन्मध्ये महाकवेः अश्वघोषविरचितं बुद्धचरितम् एकं अन्यतमं महाकाव्यम्। भगवतः बुद्धस्य जीवनमबलम्ब्य अष्टाविंशतिसंख्यकैः सर्गैः रचितं महाकाव्यमेतद्। महाकाव्येऽस्मिन् काव्यगतविषयेन सह दर्शन-व्याकरण-धर्मशास्त्र-कामशास्त्रगतविषयाः, तथा च आयुर्वैदिकसिद्धान्ताः अपि निबद्धाः सन्ति। बुद्धचरितमहाकाव्ये वर्णितानाम् आयुर्वैदिकप्रयोगानां विश्लेषणमेव प्रबन्धस्यास्य विषयः।

**कूटशब्दः** आयुः, चरकः, बुद्धः, आरोग्यम्

**प्रस्तावना**
संस्कृतसाहित्ये कवेः नाट्यकारस्य तथा बौद्धधर्माचार्यस्य अश्वघोषस्य महदवदानं विद्यते। प्रथमशतकः अर्थात् सम्राट्-कनिष्कस्य समय एव तस्य समयकाल इति मन्यते। सौन्दरानन्दमहाकाव्यस्य पुष्पिकायाः कविपरिचयः ज्ञायते। तस्य मातुर्नाम सुवर्णाक्षी इति आसीत्। सः साकेतनगर्य्याम् अवसत्। रामायणे महाभारते जैनदर्शने बौद्धदर्शने च तस्य पाण्डित्यमासीत्। तस्य विरचिताः ग्रन्थाः भवन्ति बुद्धचरितम् महाकाव्यम्, सौन्दरनन्दमहाकाव्यम् शारिपुत्रप्रकणमित्यादयः। तस्य विरचितेषु ग्रन्थेषु बुद्धचरितम् प्रसिद्धः ग्रन्थः। भगवतः बुद्धस्य जीवनचरितमबलम्ब्य रचितस्य अस्य महाकाव्यस्य सर्गाः इत्सिंमते अष्टाविंशतिसंख्यकाः। भारतवर्षे अस्य ग्रन्थस्य सप्तविंशतिसर्गाः उपलभ्यन्ते। अन्तिमसर्गचतुष्टयं अमृतानन्द इति कविना विरचितमिति अनुमीयते। कथायाः विन्यासेन, रसपरिवेशनेन, चरित्रचित्रनेन, भाषायाः माधुर्य्येन, छन्दसः सुषमया च कवेः नैपुन्यता महाकाव्येऽस्मिन् परिलक्ष्यते। एतानतिरिच्य आयुर्वेदशास्त्रेऽपि कवेः पाण्डित्यम् आसीदिति अस्य महाकाव्यस्य प्रतिसर्गेषु परिदृश्यते।
धर्मार्थकाममोक्षानामिति एतेषां चतुर्णां वर्गानां प्राप्तेः मुख्यसाधनं भवति शरीरः – यतः उच्यते 'शरीरमाद्यं खलु धर्मसाधनम्।'[1] इति। शरीरस्य कृते प्रधानविषयः वर्तते आरोग्यम्। तत्र उच्यते यत्-

'धर्मार्थकाममोक्षानामारोग्यं मूलमुत्तमम्।
रोगास्तास्यापहर्तारं श्रेयसो जीवितस्य च।।'[2]

आयुर्वेदस्य लक्षणं चरकसंहितायां परिलक्ष्यते –

**Corresponding Author:**
**Seuli Biswas**
Research Scholar,
Jadavpur University, Kolkata,
West Bengal, India

'हिताहितं सुखं दुःखमायुस्तस्य हिताहितं।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः सः उच्यते।।'[3]

शरीर-इन्द्रिय-मन-आत्मनां संयोगम् आयुरिति उच्यते।[4] आयुर्वेदस्य मुख्योद्देश्यं वर्तते – 'प्रयोजनं चास्य स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य विकारप्रशमनम्।'[5] सुश्रुतसंहितायामपि एवमेवोक्तम्।[6] आयुर्वेदस्य अष्टौ मुख्याः अङ्गाः सन्ति, ते यथा- शल्यतन्त्रं, शालक्यतन्त्रं, कायचिकित्सा, भूतविद्या, कुमारभृत्यः, अगदतन्त्रं, रसायनतन्त्रं वाजीकरतन्त्रञ्च। एतेषां शाखानां विविधाः प्रयोगाः बुद्धचरितमहाकाव्ये दृश्यन्ते । आयुर्वेदस्य प्राचीनाः प्रसिद्धाः ग्रन्थाः सन्ति चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयसंहिता, अष्टाङ्गसंग्रहः, रसरत्नसमुच्चयः चेत्यादयः।
चरकसंहितायाः अध्यायानां प्रथमश्लोकेषु भगवतः आत्रेयस्य नामोल्लेखं वर्तते – 'इति ह स्माह भगवानात्रेयः।'[7] इति। अष्टाङ्गसंग्रहस्य प्रथमेऽध्याये भगवते बुद्धाय प्रणामं विज्ञापितमस्ति। अस्य ग्रन्थस्य एव प्रत्येकेषु अध्यायेषु महर्षेरात्रेयस्य नाम विद्यते। चरकसंहितायां भिक्षुरात्रेयः ऋषिरात्रेयः इति आत्रेयनाम्ना जनाद्वयमस्ति - 'तथेति भिक्षुरात्रेयो न ह्यपत्यं.....। अथात्रेयस्य भगवतो वचनमनुनिशम्य।'[8] इति।
बुद्धचरितमहाकाव्ये आत्रेयः आयुर्वेदस्य कर्ता इति उच्यते–' वाल्मीकिरादौ......ऋषिर्जगाद।'[9] ईप्यित्वादपि चिकित्साशास्त्रे अत्रिः ग्रन्थरचनायां असमर्थः आसीत्, महर्षिः आत्रेयः ग्रन्थं रचयामास। महर्षिच्यवन् अश्विनीकुमारद्वयस्य कृपया बृद्धत्वेऽपि योवनं प्राप्तवान्।
चरकसंहितायाम् उक्तं यत् – एकस्मिन् काले आत्रेय-शाकुन्तेय-पूर्णाङ्ग-काङ्कायणादयः प्रमुखाः वैद्याः चैत्ररथवने समागताः आसन्।[10] बुद्धचरिते उक्तम् यत् - लुम्बिनीवनं चित्ररथकानन इव मनोहरमासीत् इति।[11]
अपि च एवमेव उक्तं यत् वयसि गतेऽपि राजर्षिः ययातिः चैत्ररथकानने अप्सरया विश्वाच्या सह रमणं कृतवान् –

'ययातिश्चैव राजर्षिर्वयस्यपि विनिर्गते।
विश्वाच्याप्सरसा सार्धं रेमे चैत्ररथे वने'।।[12]

अर्थात् महाकविः चैत्ररतकाननविषये परिज्ञातः आसीत्।
अष्टाङ्गसंग्रहे कथितमस्ति यत् दोषस्य विषमतया रोगः भवति- 'रोगस्तु दोषवैशम्यात्'।[13] वायु-पित्त-कफेति त्रिविधाः भौतिकदोषाः। वायुपित्तकफाः इति एतेः त्रयः प्राणीदेहे विकृतरूपेण स्वाभाविकरूपेण वा सदैव वर्तन्ते, वैद्यैः एताः सम्यक् परीक्ष्यन्ते।[14] ज्वरः अतिसारः कुष्ठः चेत्यादयः तेषां विकाराः । रजस्तमः मानसिकदोषः इति चरकसंहितायामुच्यते।[15] बुद्धचरिते बुद्धं प्रति सारथिना उक्तं यत् शरीरस्थाः धातवः अर्थात् वायुपित्तकफाः क्षुब्धे सति, रोगाः उत्पद्यन्ते वर्धन्ते च, तस्मात् रोगाक्रान्तः जनः परतन्त्रः वशीकृतः वा भवति। सामान्यतया एतेषां दोषत्रयानां प्रकोपः दृश्यते। त्रिदोषप्रकोपात् रोगपीडिताः अपि जनाः आरोग्यप्राप्तेरनन्तरं सर्वं कष्टं विस्मृत्य सुखं अनुभवन्ति।[16] दोषस्य समता एव आरोग्यम्- 'दोषसाम्यमरोगता।'[17] रोगस्य आश्रयस्थलं भवति शरीरं मनश्च।[18] अत्रिपुत्रस्य मते धातुसाम्यम् भवति आयुर्वेदशास्त्रस्य प्रयोजनम् इति – 'धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम्।[19] धातुसाम्यशब्दस्य अर्थः भवति आरोग्यम्। अत्रिपुत्रेण उक्तं यत् – 'विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते।'[20] वायुपित्तकफानां वैषम्यं रोग इति उच्यते, तथा च तेषां समत्वमेव स्वास्थ्यमिति कथ्यते। आरोग्यमस्ति सुखः, रोगश्च दुःख इति उच्यते। महाकविः अश्वघोषः बुद्धचरिते धातुसाम्यमिति एतत् पदं प्रयुक्तवान्। भगवता बुद्धेन उक्तं यत् वायु-पित्त-कफेति एतेषां धातूत्रयाणां समत्वं सुस्वास्थ्यं जनयति –'तावुभौ न्ययतः पृष्ट्वा धातुसाम्यं परस्परम्।'[21] इति।
चरकसंहितायां पुरुषस्य रोगस्य च उत्पत्तिविषये विविधऋषीणां मतम् उपस्थाप्य भिक्षुरात्रेयस्य महर्षिरात्रेयस्य च मतम् उपस्थापितमस्ति। भिक्षुरात्रेयस्य मते पुरुषस्य उत्पत्तेः कारणं भवति कालः। रोगाः कालात् आविर्भवन्ति तथा च सर्वे लोकाः कालवशाः।[22] आहारविषये भगवतः आत्रेयस्य मतं यथा – हिताहारसेवनमेव मनुष्यस्य सुखवृद्धेः कारणं तथा च अहिताहारं रोगस्य कारणम् भवति –'हिताहारयोग एक एव पुरुषस्यातिवृद्धिकरो भवति अहिताहारोपयोगः पुनर्व्याधिनिमित्तमिति।'[23] सुश्रुतसंहितानुसारं स्वभावः, ईश्वरः, कालः, यदृच्छा, नियतिः, परिणामः एव च प्रकृतिः, आकाशादयः भूतसमूहाः भवन्ति सत्त्व-रज-तम-मोहमयाः इति। एतेभ्यः आकाशादिभूतेभ्यः स्थावर-जङ्गमात्मकानि भूतानि जातानि।[24]
बुद्धचरितमहाकाव्ये उक्तविषयाः अवलोक्यन्ते। कतिपयजनाः अग्नेः उष्णता इव, जलस्य च आर्द्रता इव प्रकृतिमेव अलौकिकसत्त्वायाः कारणं मन्यन्ते । बहूनां जनानां मते प्रकृतेः स्वभावात् वा शुभाशुभयोः सृष्टिरभवत्। मोक्षस्य कृते प्रयत्नः वृथा इति । यथा इन्द्रियाणि स्वीयविषयं गृह्णन्ति तथैव रोगाः प्रकृतेः नियमानुसारेण जीवं आक्राम्यन्ति, किन्तु पारमार्थिकलोकः प्रकृत्या नियन्त्रितः भवति –

'यदिन्द्रियाणां नियतः प्रचारः प्रियाप्रियत्वं विषयेषु चैव।
संयुज्यते यज्ज्वरयातभिश्च कस्तत्र यत्नो ननु स स्वभावः'।।[25]

क्षिति-अप-तेजादयः स्वरूपतः पृथक्विधाः किन्तु मिलितरूपेण ते जगत् धारयन्ति। अश्वघोषस्य मतानुसारेण अजातस्य शिशोः बाहुपादोदरादिवदेव आत्मना सह शरीरस्य सम्बन्धः स्वाभाविकतया एव भवति। अनेकानाम् मते ईश्वरात् सृष्टिःभवति, आत्मनः कारणेन जन्मः तथा च जन्मक्षयः मोक्षप्राप्तिः वा भवति। यत्नं विना जन्म भवति, यत्नं विना मोक्षप्राप्तिरपि भवति॥ [26]

चरकसंहितायां प्रवृत्तेः मूलं निवृत्तेरुपायश्च परिलक्ष्येते। अस्मिन् विषये आत्रेयस्य मतं यथा – मोहः, इच्छा, द्वेषः कर्म च प्रवृत्तेः मूलम्। तस्मात् अहंकारः, आसक्तिः, संशयः, अभिप्लवः, अभ्यवपातः, विप्रत्ययः, विशेषः अनुपायश्च उपस्थिताः भवन्ति।[27]

बुद्धचरिते सुचारुतया एतेषां वर्णना प्राप्यते। भगवता बुद्धेन उक्तं यत् विप्रत्यय-अहङ्कार-संशय-अभिप्लव-अविशेष-अनुपाय-आसक्ति- अभ्यपातवशेभ्यश्च जीवः आत्मनः मुक्तिं नाप्नुवन्ति। यथा –

चरके उक्तं 'विप्रत्ययविषये यत् कार्य्याकार्य्य-हिताहित-शुभाशुभेषु विपरीताभिनिवेशो विप्रत्ययः।'[28] इति। बुद्धचरितानुसारेण कर्तव्यस्य विरुद्धाचारः एव विप्रत्ययः।

'जातिरूपवित्तबुद्धिशीलविद्याभि-जन-वयो-वीर्य्य-प्रभाव-सम्पन्नोऽहमित्यहङ्कारः।'[29] इति। बुद्धचरितेऽपि उक्तं यत् अहं तिष्ठामि, अहं गच्छामि, एतद् मम इति चिन्तनमेव अहङ्कारः।

'कर्म्मफलमोक्षपुरुषप्रेत्यभावादयः सन्ति वा नेति संशयः।'[30] अस्मिन् विषये भगवता बुद्धेन उक्तं यत् अविमिश्रद्रव्यस्य मृत्तिकावत् दर्शनमेव सन्देहः।

'सर्व्वास्ववस्थास्वनन्योऽहमहं स्रष्टा........शरीरेन्द्रियबुद्धिस्मृतिविशेष-राशिरिति ग्रहणमभिप्लवः।' [31] इति। भगवतः बुद्धस्य मते - यः अहम्, तदेव इदं मनः, कर्मणां समष्टिः, सोऽहम् इति भावना भवति अभिप्लवः।

चरकसंहितानुसारेण – 'ज्ञाज्ञयोः प्रकृतिविकारयोः प्रवृत्तिनिवृत्त्योश्चासामान्यदर्शनं विशेषः।' [32] अस्मिन् विषये भगवतः बुद्धस्य मतं यथा - ज्ञानाज्ञानयोः प्रकृतीनां च अविशेषत्वं ज्ञापयति यः सोऽविशेषः।

'प्रोक्षणानशनाग्निहोत्र-त्रिषवणाभ्युक्षणा......हुताशनाप्रवेशना-दयः समारम्भाः प्रोच्यन्ते ह्यनुपायाः।' अस्मिन् प्रसङ्गे अश्वघोषेन तस्य महाकाव्ये उक्तं यत् नमस्कार, वषट्कारः, प्रोक्षणमित्यादयः अनुपायः इति उच्यते।

'यन्मनोवाक्कायकर्म्म नापवर्गाय स सङ्गः।' [33] बुद्धचरितानुसारेणापि एवमेव उक्तं - मनसा वाचा बुद्ध्या कर्मणा च विषयेषु जीवस्य आसक्तिरेव विषयासक्तिः इति कथ्यते।

'मम मातृ-पितृ-भ्रातृ-दारापत्य-वन्धु-मित्र-भृत्यगणो गणस्य चाहमित्यभ्यवपातः।'[34] अस्मिन् विषये भगवतः बुद्धस्य वचनं, यथा – अहम् अस्य, एषः मम इति दम्भात् उत्पद्यमानं दुःखं अभ्यवपात इति उच्यते, येन जीवानां संसारे पतनं भवति –

'ममेदमहमस्येति यद्दुःखमभिमन्यते।
विज्ञेयोऽभ्यपातः स संसारे येन पात्यते'।।[35]

आयुर्वेदशास्त्रे अष्ट प्रकृतयः सन्ति। ते यथा – अव्यक्तः, बुद्धिः, अहंकारः, क्षितिः, अप्, तेजः, मरुत्, व्योमश्च । नेत्रादीनि एकादशेन्द्रियानि भवन्ति विकाराः, रूपरसादयश्च विषयाः।[36] बुद्धचरिते अस्य निदर्शनं परिलक्ष्यते –

'तत्र तु प्रकृतिं नाम विद्धि प्रकृतिकोविद।
पञ्च भूतान्यहंकारं बुद्धिमव्यक्तमेव च'।।[37]

**उपसंहारः** – महाकाव्यमिदम् अधीत्य ज्ञायते यत् काव्य-दर्शन-व्याकरणादिविषयानतिरिच्य आयुर्वेदशास्त्रेऽपि महाकवेः अश्वघोषस्य विशेषतया नैपुण्यम् आसीत्। आयुर्वेदशास्त्रे महाकवेः पाण्डित्यस्य निदर्शनं प्रतिसर्गेषु एव परिलक्ष्यते। महाकवेः आसामान्यप्रतिभया बुद्धचरितमहाकाव्येन सह अन्येषु ग्रन्थेषु अपि आयुर्वेदस्य प्रयोगं परिलक्ष्यते।

**ग्रन्थपञ्जी**

चरकसंहिता, सम्पा- कविराज यशोदानन्दन सरकार, तृतीयसंस्करणम्, १३३०, वङ्गवासी कार्यालय,कलकाता।

सुश्रुत-संहिता, सम्पा- कविराज यशोदानन्दन सरकार,द्वितीयसंस्करणम्, १३१८, वङ्गवासी इलेक्ट्रो-मेशिनयन्त्रम्,कलकाता।

अष्टाङ्गसंग्रह, सम्पा-कविराज अत्रिदेव गुप्त, २००७, निर्णयसागर मुद्रणालयप्रकाशन, वम्बइ ।

अष्टाङ्गहृदयसंहिता, सम्पा-कविराज विनोदलालसेन महाशय, तृतीयसंस्करणम्, १३३९, कलिकाता।

साहित्यदर्पणम्,सम्पा-विमलाकान्तमुखोपाध्याय, १३६७ वङ्गाब्दः,संस्कृत पुस्तक भाण्डार, कलकाता।

बुद्धचरितम्,सम्पा- जयश्री चट्टोपाध्याय,संस्कृत पुस्तक भाण्डार,२००८,कलकाता।

कुमारसम्भवम्, सम्पा- वासुदेव शर्मा,द्वादशसंस्करणम्, निर्णयसागरमुद्रणालयः,१९५३,मुम्बइ।

## संदर्भ


1. कुमारसम्भवम् ५/३३
2. चरकसंहिता सुत्र. १/५
3. तत्रैव १/ १५
4. तत्रैव १/ १६
5. तत्रैव ३०/१५
6. सुश्रुतसंहिता सूत्र. १/१२
7. चरकसंहिता सूत्र. १/१
8. तत्रैव २५/१२, १५
9. बुद्धचरितम् १/४३
10. चरकसंहिता सूत्र. २६/२
11. बुद्धचरितम् १/६
12. तत्रैव ४/७८
13. अष्टाङ्गसंग्रह सूत्र. १/४३
14. चरकसंहिता सूत्र. १८/४५।
15. चरकसंहिता विमान.६/७-८
16. बुद्धचरितम् ३/४२,४३
17. अष्टाङ्गसंग्रह सूत्र. १/४३
18. अष्टाङ्गहृदयसंहिता सूत्र.पृष्ठाङ्कः - १७
19. चरकसंहिता सूत्र.१/२६
20. तत्रैव ९/३
21. बुद्धचरितम् १२ /३
22. चरकसंहिता सूत्र.२५/३-२४
23. तत्रैव २५/१५
24. सुश्रुतसंहिता शारीर. १/२
25. बुद्धचरितम् ९/५९
26. तत्रैव ९/५६-६४
27. चरकसंहिता शारीर. ५/१०-२१
28. तत्रैव ५/१७
29. तत्रैव ५/१२
30. तत्रैव ५/१४
31. तत्रैव ५/१५
32. तत्रैव ५/१८
33. तत्रैव ५/१३
34. तत्रैव ५/१६
35. बुद्धचरितम् १२/३२
36. सुश्रुतसंहिता शारीर. १/७
37. बुद्धचरितम् १२/१८, १२/१९